# श्रीसुरसरस्वतीसभा, शृङ्गेरी

## तुरीया परीक्षा

### प्रथमपत्रिका

दिनाङ्कः -०२-०२-२०२० | अङ्काः - १००

पूर्वाह्णे – १०:०० वादनतः १:०० वादनपर्यन्तम् | समयः – घण्टात्रयम्

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

**1. पञ्चानां एकवाक्येन उत्तरं लिखत।** **5**

१. आम्बिकेयः कः ?

२. तुङ्गातरङ्गिणीवातशीतलं क्षेत्रं किम् ?

३. वैराग्यशतकं केन विरचितम् ?

४. अभिमन्योः प्रपौत्रः कः ?

५. भूतानां प्रलयोदयौ कौ ?

६. गुरूणां गुरुः कः?

७. हनुमान् कस्मिन् काले लङ्कां प्रविष्टः ?

८. विदर्भराजः कः ?

**2. पञ्चानां द्वित्रैः वाक्यैः उत्तरं लिखत।** **10**

१. शिवगुरुः शङ्करैकभावं कथं कलयति ?

२. भगवतः विभूतिः कीदृशी ?

३. सहस्रानीकः कः ? तं देवेन्द्रः किमुवाच ?

४. द्रुपदं दृष्ट्वा द्रोणः किमाह ?

५. इन्द्राग्नियमवरुणैः नलाय के के वराः दत्ताः?

६. पाठप्रारम्भाय विलम्बमानं गुरुं पद्मपादः किमभ्यधात् ?

७. पाण्डुनृपेण ताडितः मृगरूपधरः ऋषिः तं किमाह ?

**3. द्वयोः पञ्चषैः वाक्यैः उत्तरं लिखत ।** **8**

१. रघोरौदार्यं विशदयत ।

२. गिरिः गुरुसेवां कथं विदधौ ?

३. भगवता वेदव्यासेन उक्तं द्रौपद्याः पूर्ववृत्तान्तं वर्णयत ।

४. वाल्मीकिकृतचन्द्रोदयवर्णनं कुरुत ।

**4. वाक्यत्रयं सप्रसङ्गं विवृणुत ।** **9**

१. " सर्वोपकारक्षममाश्रमं ते " ।

२. " शीर्षेऽस्य व्यरचि रयेण पुष्पवृष्टिः " ।

३. " सज्जाभव कुलिशप्रहारं कुसुमाञ्जलिना धर्तुम् " ।

४. " भोः कुमाराः ! पश्यत मे कौशलम् " ।

५. " राजन् ! तव शापस्य विमोचनकालः सन्निहितः " ।

**5. द्वयोः भावं विशदयत ।** **8**

१. यस्य चेतसि वर्तेथाः स तावत्कृतिनां वरः ।
किं पुनर्ब्रह्मयोनेर्यः तव चेतसि वर्तते ॥

२. साफल्यं कृततपसो विधातुकामः सद्विप्रान् बहुरुचि भोजयाञ्चकार ।
सद्भक्त्या तदशितशेषभोक्तृभर्तुः शिष्टं साऽन्वशितवती दधार गर्भम् ॥

३. जनस्य साकेतनिवासिनस्तौ द्वावप्यभूतामभिनन्द्यसत्त्वौ ।
गुरुप्रदेयाधिकनिस्स्पृहोऽर्थी नृपोऽर्थिकामादधिकप्रदश्च ॥

**6. श्लोकद्वयं पूर्णं लिखत ।** **4**

१. प्रारभ्यते ____________________ न परित्यजन्ति ॥

२. भवन्ति ______________________ परोपकारिणाम् ॥

**5 एकस्य कवेः देश-काल-कृति-महत्त्वादीनाम् विषये लिखत ।** **4**

१. लक्ष्मणसूरिः २. कालिदासः

**6. एकस्य लघुटिप्पणीं लिखत।** 4

१. उदयनः २. दमयन्ती

**7. चत्वारि पदानि वाक्ये योजयत।** 4

१. शुश्रूषा २. बद्ध्वा ३. अनुनीय

४. धर्तुम् ५. भक्त्या ६. सहसा

**8. चतुर्णां रूपाणि विवेचयत।** 4

१. गच्छन् २. रराज ३. भैमी

४. अयुज्यत ५. पाराशर्यः ६. निष्क्रष्टुम्

**9. चतुर्णां पर्यायपदानि लिखत।** 4

१. भूमिसूनुः २. वर्त्म ३. जाम्बूनदम्

४. ईड्यम् ५. वीटा ६. तरङ्गिणी

**10. चतुर्णां विग्रहवाक्यं विलिख्य समासनाम लिखत।** 4

१. वृक्षलतागुल्मानि २. सर्वलक्षणसम्पन्नः ३. त्रिभुवनम्

४. कार्यदक्षः ५. प्राप्तयौवनः ६. पारेगङ्गम्

**11. चतुर्णां सन्धिं विभज्य नाम लिखत।** 4

१. स्वाभीष्टप्रदेशे २. पृच्छंस्तेन ३. पर्यटन्नटवीम्

४. तेष्वन्यतमः ५. अहोरात्रैर्यान्तः ६. पार्थादन्येन

**12. द्वयोः तत्तल्लकारे पुरुषत्रये सर्वाणि रूपाणि लिखत।** 6

१. अपृच्छत् २. उवाच ३. भाति ४. त्यक्ष्यति

**13. द्वयोः व्याकरणविशेषं लिखत।** 4

१. आस्ते स्म २. अन्तर्वत्नी ३. नरकात् त्रायते

४. महाराजः

**14. समासमेकं सलक्ष्णं विशदयत ।** **4**

१. अव्ययीभावसमासः २. बहुव्रीहिसमासः

**15. चतुर्थं पदं लिखत ।** **4**

१. चक्रपाणिः - बहुव्रीहिः :: पाणिपादम् ________

२. हैडिम्बेयः - घटोत्कचः :: गाङ्गेयः ________

३. शतानीकः - विष्णुमती :: अभिमन्युः ________

४. उदयनचरितम् - अनन्ताचार्यः :: शिवस्तुतिः ________

**16. इतरवचनानि लिखत ।** **4**

१. ______ ________ सर्वे ।

२. कवची ________ ________ ।

३. दुर्वासाः ________ ________ ।

४. ________ रोचेताम् ________ ।

**17. रिक्तस्थानानि पूरयत ।** **4**

१. अस्त्वेकः__________________ इत्युवाच विप्रः।

२. गान्धारी तु ____________ गर्भं धारयमाणासीत् ।

३. तस्मात् प्रयतस्व ____________ गृहिणीपदप्राप्तये।

४. अस्ति ______________________ नाम जनपदः।

**18. प्रयोगपरिवर्तनं कुरुत ।** **2**

१. हे नाथ! श्रूयताम् किञ्चित् ।

२. सः तेन बलवत् मर्मणि ताडितः ।

--------------------------------

# श्रीसुरसरस्वतीसभा, श्रृङ्गेरी
## तुरीया परीक्षा
### द्वितीयपत्रिका

दिनाङ्कः- ०२-०२-२०२० अङ्काः - ५०

पूर्वाह्णे –१: ३० तः ३: ०० पर्यन्तम् समयः – सार्धैकहोरा

सूचना – सर्वाणि उत्तराणि संस्कृते एव लेखनीयानि

**1 विषयमेकम् अधिकृत्य दशभिः वाक्यैः प्रबन्धमेकं लिखत ।** **5**

१. सत्सङ्गतिः २. गणतन्त्रोत्सवः ३. महाभारतम्

2 (अ) द्वितीया विभक्तिः कदा भवति ? सोदाहरणं विवृणुत । 4

(आ) दशलकाराः के ? कस्मिन् काले, अर्थे च तेषाम् उपयोगः भवति ? सोदाहरणं स्पष्टीकुरुत । 4

3 (अ) वक्रोक्ति-अलङ्कारं सोदाहरणं सलक्षणं विशदयत । 4

(आ) " **शैलाधिराजतनया न ययौ न तस्थौ** "- एतस्य वृत्तं सलक्षणं सप्रस्तारं च निरूपयत । 4

**4. उत्तरं लिखत । (त्रयाणामेव)** **3**

१. भावे प्रयोगे कस्य प्राधान्यम् ?

२. अर्धविरामचिह्नं कदा उपयुज्यते ? सोदाहरणं लिखत ।

३. सर्वगुरुः कुत्र भवति (कस्मिन् गणे) ?

४. ' ऋते ' इति अव्ययस्य योगे का विभक्तिः उपयुज्यते ?

**5 द्वयोः लकारयोः पुरुषत्रये सर्वरूपाणि लिखत ।** **6**

१. पपाच २. भविता ३. अकार्षीत् ४. चक्रे

**6 प्रयोगपरिवर्तनं कुरुत ।** **4**

१. अस्माभिः स्थास्यते। २. सः रामं अपश्यत्। ३.कृष्णेन नवनीतम् अपह्रियते ।

४. तमसा नश्यताम्।

7 **वाक्यदोषं परिहरत ।** 4

१. हरिं भक्तिः रोचते ।

२. भर्तुः साकं गता सीता ।

३. रामः रावणात् क्रुध्यति ।

४. भक्तः पापेन विरमति ।

8 **टिप्पणीं लिखत । (एकस्य)** 2

१. निर्धारणम्

२. अनुप्रासालङ्कारः

9 **मातृभाषया अनुवदत ।** 5

१. श्रीरामेण सर्वाः प्रजाः धर्मतत्पराः चक्रिरे ।

२. पाण्डवाः द्वादश वर्षाणि वने अवात्सुः।

३. गुरोः प्रसादेन विद्वांसः भूयास्म ।

४. इमे संस्कृतस्य प्राशस्त्यम् अधिकृत्य भणितारः ।

५. यद्यसौ सम्यगपठिष्यत् तर्हि परीक्षायाम् उत्तीर्णो अभविष्यत् ।

10 **संस्कृतभाषया परिवर्तयत ।** 5

1. ಹನುಮಂತನು ಲಂಕೆಯನ್ನು ಪ್ರವೇಶಿಸಿದನು.

   Hanuman entered Lanka.

2. ಹಸುಗಳು ಕರೆಯಲ್ಪಡುತ್ತಿರುವಾಗ ಅವನು ಹೋದನು.

   He went when cows were being milked.

3. ಯಾವನು ಈ ಕೆಲಸವನ್ನು ಮಾಡಿದ ?

   Who did this work ?

4. ನೀವೆಲ್ಲರೂ ದೀರ್ಘಕಾಲ ಬಾಳಿರಿ.

   May you all live long.

5. ಚಂದ್ರನು ಉದಿಸಲಾಗಿ ಕತ್ತಲೆ ನಶಿಸಿತು .

   Darkness disappeared as the Moon rose up.

---------------------------------